# वाक्यपदीये कर्मभेदविमर्श:

गिरिधारी पण्डा

वैयाकरणविचारानुसारं वाक्ये तिङन्तपदं मुख्यम्, यस्याधारेण विवक्षानुरोधादितराणि पदानि संघटितानि जायन्ते, तानि पदानि पृथग्भावेन समुदितेन वा क्रियया सह अन्वयं यान्ति, स च सम्बन्ध: क्रियाकारकरूप:। महामुनिना पाणिनिना कारकम्[१] इति सूत्रेण तस्य विमण्डनं विहितम्। “कारकह्व[२]मितिपरिभाषया कर्त्तृकर्मादिव्यवस्थाद्वारा च तेषां सम्बन्धोऽवधीयते। तस्य लक्षणं विभिन्नत्र विभिन्नभावेन विद्यते। शास्त्रकारा: स्व-स्वमतानुसारमस्य स्वरूपं प्रतिपादयन्ति। क्रियान्वयित्वं कारकत्वम्, क्रियाजनकत्वं, करोतीति, शक्तिरितिवाकारकमिति। भर्त्तृहरि: शक्ति: कारकमिति सिद्धान्तमादाय साधनं कारकमित्यमवत्य तस्य चर्च्चायां साधनसमुद्देशभावेन प्रकरणमुपपाद्य कारिकामुखेन गोपायितस्य तथ्यस्योपपादनं विचारितवान्। तत्र साधनस्य लक्षणं, स्वरूपं भेद:, कर्मसाधनं, हेतुकरणयो: विशेषवर्णनम्, कर्मकर्त्तृत्वस्य सम्भवत्वकथनं, कारणस्य कर्त्तृत्वविचार:,प्रयोज्यवृत्ते: स्वातन्त्र्यकथनम्, अपादानादिनिरूपणम्, हेतो: प्रयोजकत्वविचार:, सम्बन्धस्य कारकत्वविचार:, प्रथमार्थविचार इत्यादिभावेन विचारा: प्रदर्शिता:। केषाञ्चित् प्रयोगाणामप्युपपादनं विहितम्। यथा अङ्कुरो जायते, ग्रामे उपवसति, अत्वं त्वं भवसि/भवति। एतद्विचारे दीक्षितकौण्डभट्टनागेशप्रभृतय: पाणिनीया आचार्या: भर्त्तृहरे: कारिकां सिद्धान्तत्वेन व्यवस्थापयन्ति। तत्र विधौ भर्त्तृहरे: स्वतन्त्रस्थानम् अनन्य: निर्दिष्ट: विचार: इत्यधिगतं जायते। येन तस्यैव कारकतत्वस्याकलनपुरस्सरं कर्त्तृ-कर्मादिषु कारकेषु केवलं कर्मकारकस्य भेदविषयकंतथ्यमाधारीकृत्य अत्रोपपादनं विहितम्।तत्र कारिकामुखेन निवर्त्य-विकार्य–प्राप्यादीनां कर्मादीनां लक्षणं समुपपादितं वाक्यपदीये,तेषामुपस्थापनपुर:सरं समीक्षणमत्र संक्षेपेन विधीयते।

व्याकरणशास्त्रे कारकमिति संज्ञावोधकं पदं पारिभाषिकं निर्वचनम्,यस्य संघटनं कारके [१] इति अधिकारसूत्रबलेन विधीयते। षट्स्वेव कारकेषु कर्मकारकमन्यतमम्। पाणिनीये व्याकरणे

कर्मकारकस्य कृते कर्मनिर्दिष्टसाधकस्य कृते च बहूनि सूत्राण्युपपादितानि जायन्ते। तत्र पाणिनौ कर्मलक्षणस्य कृते सूत्रचतुष्टयमुपपन्नं जायते।तद्यथा-

१. कर्त्तृरीप्सीततमं कर्म ( )

२. तथायुक्तं चानीप्सितम् ( )

३. अकथितञ्च ( )

४. गतिबुद्धिप्रत्यवसानार्थ... .. ( )

उपपन्नं यदुद्देश्येन द्वितीयाविभक्तेः विधानमेवञ्च कर्मप्रवचनीयञ्च साधनमिति विचारः अपेक्षितो जायते भर्त्तुहरिः कारिकाक्रमेण सर्वमेतत् विचारितम्।

मुख्यतः पाणिनौ व्याकरणान्तरे च कर्मणः द्विविधं निर्वचनं पारिभाषिकं लाक्षणिकञ्चेति भावेन प्रतपिन्नं विद्यते। कर्त्तृरीप्सिततमं कर्म, क्रियाजन्यफलाश्रयत्वं कर्मत्वञ्चेत्यादिभावेन वाक्यपदीय तस्य चर्च्चा ४५ कारिकामाध्यमेन कृता विद्यते। न कुत्रचिदेकत्र कर्मलक्षणं चिकीर्षितं दृश्यते। पाणिनौ कर्मलक्षणस्य कृते सूत्रचतुष्टयं कर्त्तृरीप्सिततमं कर्म[१] तथायुक्तं चानीप्सितम्[२] अकथितं च[३] गतिबुद्धिप्रत्यवसाना[४] उपपन्नम्। यदुद्देश्येन द्वितीयाविभक्तेः विधानमेवञ्च कर्मप्रवचनीयसंज्ञा-साधनमिति विचारः अपेक्षतो जायते। भर्त्तृहरिः कारिकाक्रमेण कर्मभेदः, कत्तृर्कर्मप्रक्रिया-साधनम्, कर्मप्रक्रियासाधनम्, द्रव्यकर्मप्रधानम्, अकथितकर्म, कर्मभेदेन सिद्धान्तः, निवर्त्यादिभेदसत्त्वे कर्मणः एकत्वम्, विषं भक्षयति- चौरान् पश्यति इत्यत्र कथं कर्मत्वम्, कर्मद्वययोगे प्राधान्यार्थमाश्रित्य प्राधान्ये लाद्युक्तिः, तुमुन् कत्वा इति कर्मणः कर्मकर्त्तृक्रिया, गुडं भक्षयितीत्यत्र ईप्सिततमत्वविचारः इति भावेन विविधविचाराः प्रस्तुताः दृश्यन्ते। तत्वसमासेन कारिकोपेतविषयक्रमेणेत्थम्—

निवर्त्यं च विकार्यं च प्राप्यं चेति त्रिधामतम्।
तत्रेप्सिततमं कर्म चर्तुर्धान्तत् तु कल्पितम्।। ४५।।

औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद् यच्चाप्यन्यपुर्वकम् ।। ४६।।

सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ।। ४७।।

प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा ।
निवर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ।। ४८ ।।

यदसज्जायते सद् वा जन्मना यत् प्रकाश्यते।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम् ।। ४९ ।।

प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्टादिभस्मवत्।
किञ्चिद् गुणान्तरोत्पत्तया सुवर्णादिविकारवत् ।। ५० ।।

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ।। ५१ ।।

विशेषलाभः सर्वत्र विद्यते दर्शनादिभिः।
केषाश्चित् तदभिव्यक्तिसिद्धर्दृष्टिविषादिषु।। ५२ ।।

आभासोपगमो व्यक्तिः सोढत्वमिति कर्मणि।
विशेषाः प्राप्यमाणस्य क्रियासिद्धौ व्यवस्थिताः ।। ५३ ।।

अथैवैकमपादानं शास्त्रे भेदेन दर्शितम् ।
तथैकमेव कर्मणि भेदेन प्रतिपादितम्।। ७८ ।।

निर्वर्त्यो वा विकार्यो वा प्राप्यो वा साधनाश्रयः ।
क्रियाणामेव साध्यत्वात् सिद्धरुपोऽभिधीयते।। ७९ ।।

**कर्मभेदः - ईप्सितकर्म त्रिविधम्/ अनिप्सितकर्म चतुर्विधम्—**

निवर्त्यं च विकार्यं च प्राप्यं चेति त्रिधामतम्। तत्रेप्सिततमं कर्म चर्तुर्धान्तत् तु कल्पितम्।। पुनः औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम्। संज्ञान्तरैरनाख्यातं यद् यच्चाप्यन्यपुर्वकम् ।। इति ४५, ४६- कारिकाद्वये विषयोऽयं साधितः दृश्यते। ईप्सितकर्म त्रिविधं निर्वर्त्यं, विकार्यं, प्राप्यं चेतिभावेन। इदं कर्म कर्त्तुः क्रियायाः यद् इप्सितम् आप्तुमिष्यमाण तदेव कर्म। अनीप्सितकर्म

चतुर्विधं – उदासिन्यं, प्राप्यं, संज्ञान्तरैरनाख्यातं, अन्यपूर्वकम्। तथायुक्तं चानिप्सितं इति सुत्र सन्निवद्धं इदम्। एवं ४५-४६ कारिकयो: कर्तु: ईप्सिततम कर्म तथायुक्तं चानिप्सितमिति सुत्रद्वये निर्दिष्टं ईप्सिततमं अनीप्सितं च कर्म परिगणितं विद्यते।

**निर्वर्त्त्यं कर्म / विकार्यं कर्म -**

सती वाऽविद्यमाना वा प्रकृति: परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ।। प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा । निवर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ।। इति ४७,४८,४९,५० इत्यादिषु कारिकासु निर्वर्त्त्यकर्म इत्यस्योपस्थापनं साधितम्। यस्य निर्वर्त्यमानस्य – निष्पाद्यमानस्य घटादे: - प्रकृति: उपादानकारणं सती वा – उत्पत्ते: पूर्वं विद्यमाना वा । कार्यं उत्पत्ते: पूर्वं प्रकृते: अविद्यमानत्वं अनभिव्यत्कस्वरुपम् सर्वथा बोधनीयम्। यदा प्रकृति: परिणामिनी भवति तदा तस्य स्वरुपम् दर्शनेन्द्रियग्राह्यं जायते। वस्तुगत्या पूर्वस्मिन् काले तस्य स्वरुपस्य विद्यमानता प्रतिपद्यत एव। मृदं घटं करोति इत्यादि रुपतया यदा अभेदविवक्षा तदा निर्वर्त्यकर्म न भवति। यदा तु भेदविवक्षा तयो: मृदाघटं करोतीति तदा निर्वर्त्यकर्म। प्रकृते: पूर्वं सिद्धत्वेऽपि तदानीं विकृते: निर्वर्त्यमानत्वात्। न्यायवैशेषिकाद्यनुसारेण उत्पत्ते: पूर्वं असत्, सांख्यमतेन उत्पत्ते: पूर्वं सद् एव जायते। तद् उभयमपि उत्पत्ते: पूर्वं असत् अनभिव्यक्तं वा जन्मना प्रकाशयमानत्वात् निर्वर्त्यं कर्म अभिधीयते। सांख्यानामिव अद्वैतवेदान्तानुसारेण न सत्कार्यवादीनां, वैयाकरणानां मते निर्वर्त्यं कर्म इति वक्तुं शक्यते। तस्य प्रकृति: प्रागुक्तरीत्या सति असति वा भवतु सर्वथा जन्मना प्रकाश्यमानत्वेन प्रवर्त्तते। अत: यद् सत् असत् वा जन्मना प्रकाशते तत् निवर्त्यम्। यथा पुत्रं प्रसूते, शब्दं प्रयुंक्ते इत्यत्र कुक्षिस्थस्य सत् एव पुत्रस्य विवक्षितस्य च शब्दस्य प्रसवप्रयोगाभ्यां प्रकाशनम्। सत: प्रकाशनं हि जन्म अत्र विवक्षितस्य च शब्दस्य प्रसवप्रयोगाभ्यां प्रकाशनम्। सत: प्रकाशनं हि जन्म अत्र विवक्षितं जन्मना यत् प्रकाशितम् इति।

प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठाादिभस्मवत्। किञ्चिद् गुणान्तरोत्पत्तया सुवर्णादिविकारवत् ।। - इति ५० कारिकायां विकार्यं कर्म किम् इति उपपाद्य उदाहरणमुखेन तस्य प्रदर्शनं साधितम्। यत्र प्रकृते: उच्छेद: निरन्वय: तस्मात् सम्भूतं जातं विकार्य्यं कर्म इति उच्यते। यथा काष्ठं भस्म करोति। काष्ठादिरुपाया: प्रकृते: विकारभूतम्। सुवर्णं कुण्डलं करोति इत्यादिषु उदारणेषु एवंविधं कर्म विचार्य्यते। अयमेव विशेष: यत् सति वा अविद्यमाना वा इति पूर्वलक्षणेन प्रकृते: अविवक्षायां निर्वर्त्यं कर्म। प्रकृति विवक्षायां तु विकार्यं कर्म। काष्ठं भस्मकरोति इति प्रकृतिविवक्षायां विकार्यं कर्म। वस्तुगत्या प्रकृते: विवक्षा, अविवक्षा इति तु प्रयोगप्रयोगरुपे बोधनीये। प्रकृतिभुतानि काष्ठानि साक्षात् विकार्य्यं कर्म। तेषां क्रियासम्वन्ध: प्राक् तद् अभेदेन भस्मरुपो विकारोऽपि

विकार्य्यं कर्म तस्य क्रियासम्वन्धः पश्चात्। असत्कार्यवादिनये यद्यपि अपूर्वस्य कुण्डलरुपकार्यस्य उत्पत्तिः तथापि तदेव इदं सुवर्णमिति प्रत्यभिज्ञानात्।

**प्राप्यकर्म**

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ।। पुनः विशेषलाभः सर्वत्र विद्यते दर्शनादिभिः। केषाञ्चित् तदभिव्यक्तिसिद्धर्दृष्टिविषादिषु।। - इति ५१,५२,५३ इत्यादिषु कारिकासु प्राप्यकर्मणः निर्वचनं साधितम्। दर्शनात् नाम प्रत्यक्षाद् अनुमानाद् वा क्रियाकृतविशेषाणां सिद्धिः निश्चयः यत्र प्रमाणं न गम्यते न जायते इत्यर्थः तत् प्राप्यमिति कथ्यते। यथा ग्रामं गच्छति इत्यादिषु उदाहरणेषु गते आगते वा ग्रामे गमनं क्रियाकृतं वैलक्षण्यं नानुभूयते। वनं पश्यति इत्यत्र दृष्टे अदृष्टे वा वने दर्शनक्रिया कृतं वैजात्यं न प्रत्यक्षीक्रियते न वा अनुमीयते। यथा वनं छिन्नत्ति इत्यत्र वैजात्यादिविकारक्रिया अनुभूयते। काष्ठं भस्म करोति इति वाक्ये यथाविकारस्यानुभूतिः तथा तेषु वाक्येषु नानुभूयते नानुगम्यते च। दर्शनादिक्रियाहितविशेषलाभ सर्वत्र विद्यते सुक्ष्मत्वात् नावधार्यते। चक्षुसंयुक्तविषय अवश्यं विक्रियते किन्तु प्राप्यकारी तैजश स्वभाव चक्षुसंयुक्तत्वात् दृष्टिरिव सर्पदृष्ट तृणादिवत्। अयं तु विशेष यत् दृष्टिविषदृष्टौ विषसम्पर्कात् उत्कटं तेजः विषयं दहति । अन्येषां दृष्टौ तु तदनुकुलं तत् स्थितिकं तेजविषयं स्वसंक्तं न दहति विकिरतु अवश्यमेव इति भर्तृहरेः मतम्। स तु विकारः पूर्वोक्तरीत्या अनुमेयः सुक्ष्मत्वात् अप्रत्यक्षम्। प्राप्यमानस्य कर्मणः त्रयः विशेषाः क्रियासिद्धौ व्यवस्थिताः, क्रियाकृतत्वात् विलक्ष्यणरुपेण क्रियाया हेतुत्वेन रुपेण अवस्थिता। ग्रामं गच्छति, मातरं स्मरति इत्यादिषु वाक्येषु एतस्य प्राप्यकर्म वशिेषस्योपपादनं जायते। भर्तृहरिमतेन प्राप्यकर्मणि सुक्ष्मातिसुक्ष्मविकारोपजायते किन्तु प्रत्यक्षतया तत् प्रत्यक्षीकर्तुं न पार्य्यते शक्यते च इति विशेषः विकार्यादिकर्मान्तरापेक्षया।

**कर्मभेदेन सिद्धान्तः**

निर्वर्त्यो वा विकार्यो वा प्राप्यो वा साधनाश्रयः । क्रियाणामेव साध्यत्वात् सिद्धरुपोऽभिधीयते ।। – इति ७८ कारिकायां विषयेऽस्मिन् सिद्धान्तः साधितः दृश्यते। भाष्यसिद्धान्तमादाय भर्तृहरिणोपस्थापितं यत् विभिन्नकर्मप्रतिपादितं सत् एकमेवेति सिद्धान्तः। यथा अपादानकारकमेकं तद्विधायकं ध्रुवमपायेऽपादानम्[५] इति सूत्रम्। भीत्रादीनां भयहेतुः[६] जुगुप्साविरामप्रमादार्थानामुप्संख्यानम्[७] इत्यादिसूत्रविहितं यत् यदपादानं तत्सर्वं बौद्धापायमादाय नाबधेयम् अबुद्धबोधनार्थं तत्सर्वमिति भाष्यसिद्धान्तः। मन्दबुद्ध्यनुग्रहायोत्तरसयत्राणां प्रपञ्चकर्मविषये इति भर्तृहरेराशयः। वाक्यपदीये द्वितीयकाण्डे उपपादितम्।

निंर्द्धारणेऽविभक्ते यो भीत्रार्थानां च यो विधिः। उपात्तापेक्षितापाय सोऽबुधप्रतिपत्तये।।[८]

कर्म ईप्सितमेकमेव। कर्त्तुः क्रियया आप्यमाणत्वस्य सर्वत्राभावात्। मन्दबुद्ध्यनुग्रहाय तु उत्तरसूत्रप्रपञ्च इति सिद्धान्तः।

**निवर्त्यादिभेदसत्त्वे कर्मणः एकत्वम्**

अथैवैकमपादानं शास्त्रे भेदेन दर्शितम् । तथैकमेव कर्मणि भेदेन प्रतिपादितम् - इति ७९ कारिकायामयं विषयः उत्थापितः विद्यते। ईप्सितकर्मणः भेदत्रयं निवर्त्यं, विकार्यं प्राप्यञ्चेति भेदेन। अनीप्सितकर्मणः भेदचतुष्टयम्- औदासीन्यं, संज्ञान्तरानाख्यातं चेत्यादिभावेन चर्तुविधम्। एवमाहत्य कर्मणः सप्तविधमुपपादनं विबन्धितं विद्यते। किन्तु तत्सर्वमेकमेव कर्म। आख्यातप्रतिपाद्यानां क्रियाणामेव साध्यत्वं वस्तुस्वाभाव्यात् न तु नानात्मवत्। अतः निवर्त्त्यं विकार्यं प्राप्यं वा ईप्सिततमः कर्मरुपभावसाधनम्। तदुक्तम् –

क्रियाणामेकसाध्यत्वाद् सिद्धरुपोऽभिधीयते।

सिद्धरुपनिष्पन्नरुपभाव : कर्मादीनामपदैरुच्यते। आख्यातपदे तु साध्यस्वभावः। क्रियारुपोऽर्थः अभिधीयते । भाव्यते इत्यस्य साध्यते इत्यर्थः। घटं करोति, तण्डुलान् ओदनं पचति, सूर्यं पश्यति इत्यत्र नामपदे कर्मत्वाख्यसत्ता आधारमभिलक्षणं कर्म सिद्धतयाऽऽवधीयते। तस्य कर्मणः स्वरुपभेदः स्वगतः। वस्तुवस्तु कर्मरुपाणां साधनानां क्रियार्थत्वात् क्रियारुपेण कर्मण निवर्त्त्यत्वादिना तेषां भेदेन व्यपदेशः। सर्वमीप्सितमेव कर्म। निवर्त्यादिभेदः यः केवलं प्रपञ्चार्थक इत्यवधेयम्।

**पादटीका:**

१. पा. सु. १/४/४९
२. पा. सु. १/४/५०
३. पा. सु. १/४/५१
४. पा. सु. १/४/५२
५. पा. सु. १/४/२४
६. पा. सु. १/४/२५
७. पा. सु. १/४/२४
८. पा. सू. १/४/७

**सहायकग्रन्थसूची-**

१) अष्टाध्यायी, ड. तपनशङ्करभट्टाचार्य्यः, संस्कृत-बुक-डिपो, कोलकाता, २००४

२) आख्यातवादः, प्रवालकुमार सेनः, संस्कृतपुस्तक भान्डारः, कोलकाता, १९७९

३) काशिका, ड. जयशङ्करलालत्रिपाठी, ड. सुधाकरमालवीयः, तारा-वुक्-एजेन्सी, वारनसी, १९८६

४) तत्त्वचिन्तामणिः, कामाख्यानाथतर्कवागीशः चौखम्वा-संस्कृत-प्रतिष्ठानम्, दिल्ली, १९९०

५) तर्कसंग्रहः, नारायणचन्द्रगोस्वामी, संस्कृतपुस्तकभान्डारः कोलकाताः, १३९० बङ्गाब्द।

६) न्यायदर्शनम्, श्रीयुक्तफणिभूषणतर्कबागीशः, पश्चिमवङ्ग-राजक्र-पुस्तक-पर्षद्, कोलकाता, १९८३

७) न्यायसिद्धानुमुक्तावली, किरणबलीटीकोपेता, प.श्रीकृष्ण-वल्लभाचार्य्यः चौखम्वा-संस्कृत-संस्थानम्, वारणसी, वि.सं-२०६३

८) प्रकरणपञ्चिका, शालिकनाथः, वेनारस-हिन्दु-युनिभार्सिटि, वारानसी, १९६१

९) प्रौढ़मनोरमा, शव्दरत्न-भैरवी-भावप्रकाश टीका सम्वलिता, चौखम्वा-संस्कृत-सीरीज, भारानसी।

१०) महाभाष्यम्, प. दधिरामशर्मा, चौखम्वा-सुरभारती-प्रकाशनम्, वारणसी, १९८८

११) मानमेयेदयः, श्रीदीननाथत्रिपाठिनवर्तीर्थः, संस्कृत कलेज, कोलकाता, १९९०

१२) वाक्यपदीयम्, सम्पूर्णनन्द-संस्कृत-विश्वविद्यालयः, वारणसी, १९९८

१३) वैयाकरणभूषणसारः, दर्पण-प्रभासमेतः, चौखम्वा-संस्कृत-सीरीज-अफिस, भारनसी, १९६९

१४) वैयाकरणसिद्धान्तकौमुदी, मोतीलाल वनारसी-दास दिल्ली, २०००

१५) वैयाकरणसिद्धान्तलघुमञ्जूया, कुञ्चिका-कलासम्वलिता चौखम्वा-संस्कृत-सीरीज, वाराणसी, १९८५

१६) व्याकरणदर्शनेर इतिहास, गुरुपदहालदारः, कोलकाता १३५० वङ्गाव्दः।

१७) शव्दशक्तिप्रकाशिका, चौखम्वा-संस्कृत-सीरीज, वारणसी, १९३५